मन्दतममभयमिति वर्षाणि। तेषु गिरयो नद्यश्च सप्तैवाभिज्ञाताः। मणिकूटो वज्रकूट इन्द्रसेनो ज्योतिष्मान् सुवर्णो हिरण्यष्ठीवो मेघमाल इति सेतुशैलाः। अरुणा नृम्णा आङ्गिरसी सावित्री सुप्रभाता ऋतम्भरा सत्यम्भरेति महानद्यः। यासां जलोपस्पर्शनविधूतरजस्तमसो हंसपतङ्गोर्द्ध्वायनसत्याङ्गसंज्ञाश्चत्वारो वर्णाः सहस्रायुषो विबुधोपमसन्दर्शनप्रजननाः स्वर्गद्वारं त्रय्या विद्यया भगवन्तं त्रयीमयं सूर्य्यमात्मानं यजन्ते। प्रत्नस्य विष्णो रूपं यत् सत्यर्त्तस्य ब्रह्मणः। अमृतस्य च मृत्योश्च सूर्य्यमात्मानमीमहीति॥ प्लक्षादिषु पञ्चसु पुरुषाणामायुरिन्द्रियमोजः सहो बलं बुद्धिर्विक्रम इति च सर्व्वेषामौत्पत्तिकी सिद्धिरविशेषेण वर्त्तते। प्लक्षश्च समानेनेक्षुरसोदेनावृतः।” इति श्रीभागवते ५ स्कन्धे २० अध्यायः॥

प्लव, ङ गत्याम्। (भ्वा०-आत्म०-सक०-सेट्।) अन्तःस्थतृतीययुक्तः। ङ, प्लवते। प्लु ङ इत्यनेनैवेष्टसिद्धे अस्य पाठः प्लविष्यते प्लव्यते इत्यादि सिद्ध्यर्थः। इति दुर्गादासः॥

प्लवं, क्ली, (प्लवते इति। प्लु+अच्।) कैवर्त्तीमुस्तकम्। (अस्याः पर्य्यायो यथा,—
“कुटन्नटं दासपुरं वानेयं परिपेलवम्।
प्लवगोपुरगोनर्द्दकैवर्त्तीमुस्तकानि च॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
गन्धतृणम्। इति मेदिनी। वे,१८॥ प्लुतगे, त्रि॥

प्लवः, पुं, (प्लु+“ऋदोरप्।”३।३।५७। इत्यप्।) प्लवनम्। (यथा, हरिवंशे। १२२। १०१।
“सागरानूपविपुलां प्रागुदक्प्लवशोभिताम्।
सर्व्वतोदधिमध्यस्थामभेद्यां त्रिदशैरपि॥”
प्लूयतेऽनेनेति करणे अप्।) भेलः। (यथा, मुण्डकोपनिषदि। १। २। ७।
“प्लवा ह्येते अदृढ़ा यज्ञरूपा
अष्टादशोक्तमवरं येषु कर्म्म।
एतच्छ्रेयो येऽभिनन्दन्ति मूढ़ा
जरामृत्युं ते पुनरेवापि यन्ति॥”
प्लवते सन्तरतीति। प्लु+अच्।) भेकः। अविः। श्वपचः। कपिः। जलकाकः। (यथा, सुश्रुते। १। ४६।
“प्लवानामिक्षुरसाश्रवः॥”)
कुलकः। प्लवगः। पर्कटीद्रुमः। कारण्डवविहगः। शब्दः। प्रतिगतिः। इति मेदिनी। वे, १६॥ प्रेरणम्। शत्रुः। इति शब्दरत्नावली॥ जलान्तरम्। इति हेमचन्द्रः।३। ५४३॥ पलवः। इति त्रिकाण्डशेषः॥ पोलो इति भाषा॥ जलकुक्कुटः। इति मिताक्षरा॥ (यथा, मनौ। ५। १२।
“कलविङ्कं प्लवं हंसं चक्राङ्गं ग्रामकुक्कुटम्।
सारसं रज्जुवालञ्च दात्यूहं शुकसारिके॥”
वकविशेषः। यथा, रामायणे।२।१०३।४३।
“रथाङ्गहंसा नत्यूहाः प्लवाः कारण्डवाः परे।
तथा पुंस्कोकिलाः क्रौञ्चा विसंज्ञा भेजिरे दिशः॥”
“प्लवा वकविशेषाः।” इति तट्टीकायां रामानुजः॥) जलचरपक्षिमात्रम्। यथा,—
“हंससारसकादम्बवकक्रौञ्चसरारिकाः।
नन्दीमुखी सकादम्बा वलाकाद्याः प्लवाः स्मृताः॥
प्लवन्ते सलिले यस्मादेते तस्मात् प्लवाः स्मृताः॥”
एतेषां मांसगुणाः।
“प्लवाः पित्तहराः स्निग्धा मधुरा गुरवो हिमाः।
वातश्लेष्मप्रदाश्चापि बलशुक्रकराः सराः॥”
इति भावप्रकाशः॥

प्लवकः, पुं, (प्लवते इवेति। प्लु+अच्। ततः स्वार्थे संज्ञायां वा कन्।) खड्गधारादिनर्त्तकः। तत्पर्य्यायः। केलकः २। इति त्रिकाण्डशेषः॥ केकलः ३ नर्त्तुः ४ केलिकोषः ५ कलायनः ६। इति शब्दरत्नावली॥ चण्डालः। इति हलायुधः॥ (सन्तरणोपजीवी। यथा, महाभारते। १३। २३। १५।
“गायना नर्त्तकाश्चैव प्लवका वादकास्तथा।
कथका योधकाश्चैव राजन्नार्हन्ति केतनम्॥”)
भेकः। प्लक्षः। इति राजनिर्घण्टः॥

प्लवगः, पुं, (प्लवेन प्लुतगत्या गच्छतीति। गम्+“अन्येष्वपि दृश्यते।” ३। २। १०१। इति डः।) वानरः। (यथा, रघुवंशे। १२। ७०।
“स सेतुं बन्धयामास प्लवगैर्लवणाम्भसि।
रसातलादिवोन्मग्नं शेषं स्वप्नाय शार्ङ्गिणः॥”)
भेकः। सूर्य्यसारथिः। इति मेदिनी। गे, ४२॥ प्लवपक्षी। इति शब्दरत्नावली॥ शिरीषवृक्षः। इति राजनिर्घण्टः॥

प्लवगतिः, पुं, (प्लवेन गतिर्यस्य।) भेकः। इति शब्दचन्द्रिका॥ (प्लवस्य भेकादेर्गतौ प्लुतगतौ च, स्त्री॥)

प्लवङ्गः, पुं, (प्लवेन प्लुतगत्या गच्छतीति। गम+“गमश्च।” ३। २। ४७। इति खच्। “खच्च डिद्वा वाच्यः।” इति डित्। डित्वात् टेर्लोपः। मुमागमः।) वानरः। इत्यमरः। २। ५। ३॥ (यथा, रामायणे। २। २५। १८।
“प्लवङ्गा वृश्चिका दंशा मशकाश्चैव कानने।
सरीसृपाश्च कीटाश्च माभूवन् गहने तव॥”
“प्लवङ्गा वानराः।” इति तट्टीकायां रामानुजः॥) मृगः। इति शब्दचन्द्रिका॥ प्लक्षवृक्षः। इति राजनिर्घण्टः॥

प्लवङ्गमः, पुं, (प्लवेन गच्छतीति। गम्+“गमश्च।” ३। २। ४७। इति खच्। मुमागमः।) भेकः। वानरः। इत्यमरः। ३। ३। १३७॥ (यथा, रामायणे। ४। ६२। ११।
“एष्यन्ति प्रेषितास्तत्र रामदूताः प्लवङ्गमाः।
आख्येया राममहिषी त्वया तेभ्यो विहङ्गम!॥”)
प्लुतगतियुक्ते, त्रि॥

प्लवनः, त्रि, (प्लवते इति। प्लु+ल्यु।) प्रवणः। क्रमनिम्नभूम्यादिः। यथा,—
“प्रागुदक्प्लवनां भूमिं कारयेत् यत्नतो नरः॥”
इति तिथ्यादितत्त्वे मत्स्यपुराणम्॥
(क्ली, प्लु+ल्युट्। प्लवः। यथा,—
“शयनञ्चासनं वापि नेच्छेद्वापि द्रवोत्तरम्।
नाग्न्यातपौ न प्लवनं न यानं नापि वाहनम्॥”
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः॥)

प्लाक्षं, क्ली, (प्लक्षस्य फलम्। “प्लक्षादिभ्योऽण्।” ४। ३। १६४। इत्यण्। विधानसामर्थ्यात् तस्य फले न लुक्।) प्लक्षवृक्षस्य फलम्। इत्यमरः। २।४।१८॥ प्लक्षस्य विकारः। प्लक्षस्य समूहः। प्लक्षस्य भावः। प्लक्षस्येदम्। प्लक्षस्य हितम्। इत्यादि व्याकरणम्॥ (प्लक्षसम्बन्धिनि, त्रि। यथा,—
“नैयग्रोध औदुम्बर आश्वत्थ प्लाक्ष इतीध्मो भवन्त्येते वै गान्धर्व्वाप्सरसां गृहाः स्व एव॥”
इति तैत्तिरीयसंहितायाम्। ३। ४। ८। ४॥)

प्लावनं, क्ली, (प्लु+णिच्+ल्युट्।) द्रवद्रव्यस्योर्द्ध्वप्रापणम्। उथलन इति भाषा। यथा,—
“तापनं घृततैलानां प्लावनं गोरसस्य च।
तन्मात्रसदृतं शुद्धेत् कठिनन्तु पयो दधि॥”
इति शुद्धितत्त्वम्॥ * ॥
मज्जनम्। बहुतरजलसंयोगः। यथा,—
“एतत् श्रुत्वा वचो राजा प्रातिष्ठत भगीरथः।
यत्र तानि शरीराणि सागराणां महात्मनाम्॥
प्लावनार्थं नरश्रेष्ठ! पुण्येन सलिलेन च॥”
इति महाभारते। ३। ११० अध्यायः॥

प्लावितं, त्रि, (प्लु+णिच्+क्तः।) जलादिमग्नस्थानादि। यथा,—
“सुप्रसन्नां सुवदनां करुणार्द्रनिजान्तराम्।
सुधाप्लावितभूपृष्ठामार्द्रगन्धानुलेपनाम्॥”
इति गङ्गावाक्यावली॥
(यथा च देवीभागवते। २। ८। १०।
“पुरी सा वासुदेवस्य प्लावितोदधिना ततः॥”)

प्लिह, ङ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) अन्तःस्थतृतीययुक्तः। ङ, प्लेहते। इति दुर्गादासः॥

प्लिहा, [न्] पुं, (प्लेहते वृद्धिं गच्छतीति। प्लिह+कनिन्।) प्लीहरोगः। यथा, यकृत्प्लिहानौ सुखादिव चिपन्निति वैद्यकम्। इत्यमरटीकायां भरतः॥ (यथा, याज्ञवल्क्ये।३।९४।
“वपावसावहननं नाभिः क्लोम यकृत् प्लिहा॥”)

प्लीहघ्नः, पुं, (प्लीहानं हन्तीति। हन+टक्।) वृक्षविशेषः। रोहड़ा इति ख्यातः। तत्पर्य्यायः। रोही २ रोहितकः ३ प्लीहशत्रुः ४ दाड़िमपुष्पकः ५ मांसदलनः ६ यकृद्वैरी ७ चलच्छदः ८। इति शब्दचन्द्रिका॥ रौहितेयः ९ रोहितः १० रोहीतकः ११ रौही १२। इति शब्दरत्नावली॥ (अस्य गुणाः रोहितकशब्दे द्रष्टव्याः॥)

प्लीहशत्रुः, पुं, (प्लीह्नः शत्रुर्नाशकत्वात्।) प्लीहघ्नवृक्षः। इत्यमरः। २। ४। ४९॥ (यथा, वैद्यकरत्नमालायाम्।
“रोही रोहितकः प्लीहशत्रुर्दाड़िमपुष्पकः॥”)